श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# SHRIMAD BHAGWAT RASIK KUTUMB

## Uddhav Geeta, Third Sopan(11.14)



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**अथ चतुर्दशोऽध्यायः**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. atha caturdaśo'dhyāyaḥ - 14 ..**

## उद्धव उवाच

**वदन्ति कृष्ण श्रेयां(व्)सि, बहूनि ब्रह्मवादिनः ।**
**तेषां(म्) विकल्पप्राधान्य - मुताहो एकमुख्यता ॥ 1॥**

uddhava uvāca

vadanti kṛṣṇa śreyām̐(v)si, bahūni brahmavādinaḥ .

teṣām̐(m) vikalpaprādhānya- mutāho ekamukhyatā .. 1..

vikalpa+ prā**ā**dh**ā**nya

भवतोदाहृतः(स्) स्वामिन्, भक्तियोगोऽनपेक्षितः ।

निरस्य सर्वतः(स्) संं(ङ्)गं(म्), येन त्वय्याविशेन्मनः ॥ 2 ॥

bhavatodāhṛtaḥ(s) svāmin, bhaktiyogo'napekṣitaḥ .

nirasya sarvataḥ(s) saṃ(ṅ)gaṃ(m), yena tvayyāviśenmanaḥ .. 2..

bhavato+ d**ā**h**ṛ**ta**ḥ**(s), bhaktiyogo'+ napek**ṣ**ita**ḥ**, tvayy**ā**+ vi**ś**en+ mana**ḥ**

श्रीभगवानुवाच

कालेन नष्टा प्रलये, वाणीयं(म्) वेदसं(ञ्)ज्ञिता ।

मयाऽऽदौ ब्रह्मणे प्रोक्ता, धर्मो यस्यां(म्) मदात्मकः ॥ 3 ॥

śrībhagavānuvāca

kālena naṣṭā pralaye, vāṇīyaṃ(m) vedasaṃ(ñ)jñitā .

mayā''dau brahmaṇe proktā, dharmo yasyāṃ(m) madātmakaḥ .. 3..

तेन प्रोक्ता च पुत्राय, मनवे पूर्वजाय सा ।

ततो भृग्वादयोऽगृह्णन् , सप्त ब्रह्ममहर्षयः ॥ 4 ॥

tena proktā ca putrāya, manave pūrvajāya sā .

tato bhṛgvādayo'gṛhṇan, sapta brahmamaharṣayaḥ .. 4..

bh**ṛ**gv**ā** + dayo'+ g**ṛ**h+ **ṇ**an

तेभ्यः(फ्) पितृभ्यस्तत्पुत्रा, देवदानवगुह्यकाः ।

मनुष्याः(स्) सिद्धगन्धर्वाः(स्), सविद्याधरचारणाः ॥ 5 ॥

tebhyaḥ(ph) pitṛbhyastatputrā, devadānavaguhyakāḥ .

manuṣyāḥ(s) siddhagandharvāḥ(s), savidyādharacāraṇāḥ .. 5..

pitṛbhyas+ tatputrā, deva+ dānava+ guhyakāḥ, savidyā + dharacāraṇāḥ

**किं(न्)देवाः(ख्) किन्नरा नागा, रक्षः(ख्) किम्पुरुषादयः ।**

**बह्व्यस्तेषां(म्) प्रकृतयो, रजः(स्)सत्त्वतमोभुवः ॥ 6॥**

**Kin(n)devāḥ(kh) kinnarā nāgā, rakṣaḥ(kh) kimpuruṣādayaḥ .**

**bahvyasteṣāṃ(m) prakṛtayo, rajaḥ(s)sattvatamobhuvaḥ .. 6..**

kim+ puruṣādayaḥ, bahv+ yas+ teṣāṃ(m),

rajaḥ(s)+ sat+ tvatamo+ bhuvaḥ

**याभिर्भूतानि भिद्यन्ते, भूतानां(म्) मतयस्तथा ।**

**यथाप्रकृति सर्वेषां( ञ्), चित्रा वाचः(स्) स्रवन्ति हि ॥ 7॥**

**yābhirbhūtāni bhidyante, bhūtānāṃ(m) matayastathā .**

**yathāprakṛti sarveṣāṃ(ñ), citrā vācaḥ(s) sravanti hi .. 7..**

yābhir+ bhūtāni

**एवं(म्) प्रकृतिवैचित्र्याद् - भिद्यन्ते मतयो नृणाम् ।**

**पारम्पर्येण केषाञ्चित् - पाखण्डमतयोऽपरे ॥ 8॥**

**evaṃ(m) prakṛtivaicitryād- bhidyante matayo nṛṇām .**

**pāramparyeṇa keṣāñcit- pākhaṇḍamatayo'pare .. 8..**

prakṛti+ vaicitryād, pāram+ paryeṇa, pākhaṇḍa+ matayo'+ pare

**मन्मायामोहितधियः(फ्), पुरुषाः(फ्) पुरुषर्षभ ।**

**श्रेयो वदन्त्यनेकान्तं(म्), यथाकर्म यथारुचि ॥ 9॥**

**manmāyāmohitadhiyaḥ(ph), puruṣāḥ(ph) puruṣarṣabha .**

**śreyo vadantyanekāntaṃ(m), yathākarma yathāruci .. 9..**

manmāyā + mohita+ dhiyaḥ(ph), vadantya+ nekāntaṃ(m)

**धर्ममेके यशश्चान्ये ,कामं(म्) सत्यं(न्) दमं(म्) शमम् ।**

**अन्ये वदन्ति स्वार्थं(म्) वा, ऐश्वर्यं(न्) त्यागभोजनम् ।।10।।**

dharmameke yaśāścānye, kāmaṃ(m) satyaṃ(n) damaṃ(m) śamam .

ānye vadānti svārthaṃ(m) vā, aiśvaryaṃ(n) tyāgabhojanam ... 10..

yaśaś+ cānye

केचिद् यज्ञतपोदानं(म्), व्रतानि नियमान् यमान् ।

आद्यन्तवन्त एवैषां(म्), लोकाः(ख्) कर्मविनिर्मिताः ।

दुःखोदर्कास्तमोनिष्ठाः(ह्), क्षुद्रानन्दाः(श्) शुचार्पिताः ॥ 11॥

Kecid yajñatapodānaṃ(m), vratāni niyamān yamān

ādyantavanta evaiṣāṃ(m), lokāḥ(kh) karmavinirmitāḥ .

duḥkhodarkāstamoniṣṭhāḥ(h), kṣudrānandāḥ(ś) śucārpitāḥ .. 11..

duḥkhodar+ kās+ tamoniṣṭhāḥ(h)

मय्यर्पितात्मनः(स्) सभ्य, निरपेक्षस्य सर्वतः ।

मयाऽऽत्मना सुखं(म्) यत्तत् , कुतः(स्) स्याद् विषयात्मनाम् ॥ 12॥

mayyarpitātmanaḥ(s) sabhya, nirapekṣasya sarvataḥ .

mayā''tmanā sukhaṃ(m) yattat, kutaḥ(s) syād viṣayātmanām .. 12..

mayyar+ pitāt+ manaḥ(s), viṣayāt+ manām

अकिं(ञ्)चनस्य दान्तस्य, शान्तस्य समचेतसः ।

मया सन्तुष्टमनसः(स्), सर्वाः(स्) सुखमया दिशः ॥ 13॥

akiṃ(ñ)canasya dāntasya, śāntasya samacetasaḥ .

mayā santuṣṭamanasaḥ(s), sarvāḥ(s) sukhamayā diśaḥ .. 13..

santuṣṭa+ manasaḥ(s)

न पारमेष्ठ्यं(न्) न महेन्द्रधिष्ण्यं(न्),

न सार्वभौमं(न्) न रसाधिपत्यम् ।

न योगसिद्धीरपुनर्भवं(म्) वा,

मय्यर्पितात्मेच्छति मद् विनान्यत् ॥ 14॥

na pārameṣṭhyaṃ(n) na mahendradhiṣṇyaṃ(n)

na sārvabhaumaṃ(n) na rasādhipatyam .

na yogasiddhīrapunarbhavaṃ(m) vā

mayyarpitātmecchati mad vinānyat .. 14..

yogasiddhī+ rapunar+ bhavaṃ(m), mayyar+ pitāt+ mecchati

न तथा मे प्रियतम, आत्मयोनिर्न शं(ङ्)करः ।

न च सं(ङ्)कर्षणो न श्रीर्- नैवात्मा च यथा भवान् ॥ 15॥

na tathā me priyatama, ātmayonirna śaṃ(ṅ)karaḥ .

na ca saṃ(ṅ)karṣaṇo na śrīr- naivātmā ca yathā bhavān .. 15..

ātma+ yonir+ na

निरपेक्षं(म्) मुनिं(म्) शान्तं(न्), निर्वैरं(म्) समदर्शनम् ।

अनुव्रजाम्यहं(न्) नित्यं(म्), पूयेयेत्यङ्घ्रिरेणुभिः ॥ 16॥

nirapekṣaṃ(m) muniṃ(m) śāntaṃ(n), nirvairaṃ(m) samadarśanam .

anuvrajāmyahaṃ(n) nityaṃ(m), pūyeyetyaṅghrireṇubhiḥ .. 16..

anu+ vrajām+ yahaṃ(n), pūyeyet+ yaṅghrire+ ṇubhiḥ

निष्किञ्चना मय्यनुरक्तचेतसः(श्),

शान्ता महान्तोऽखिलजीववत्सलाः ।

कामैरनालब्धधियो जुषन्ति यत्,

तन्नैरपेक्ष्यं(न्) न विदुः(स्) सुखं(म्) मम ॥ 17॥

niṣkiñcanā mayyanuraktacetasaḥ(ś)

śāntā mahānto'khilajīvavatsalāḥ .

kāmairanālabdhadhiyo juṣanti yat

tannairapekṣyaṃ(n) na viduḥ(s) sukhaṃ(m) mama .. 17..

mayyanu+ rakta+ cetasaḥ(ś), mahānto'+ khila+ jīvavatsalāḥ,

kāmai+ ranālabdha+ dhiyo, tannai+ rapekṣyaṃ(n)

बाध्यमानोऽपि मद्भक्तो, विषयैरजितेन्द्रियः ।
प्रायः(फ्) प्रगल्भया भक्त्या, विषयैर्नाभिभूयते ॥ 18॥

bādhyamāno'pi madbhakto, viṣayairajitendriyaḥ .
prāyaḥ(ph) pragalbhayā bhaktyā, viṣayairnābhibhūyate .. 18..

bādhya+ māno'pi, viṣayai+ rajitendriyaḥ, viṣayair+ nābhi+ bhūyate

यथाग्निः(स्) सुसमृद्धार्चिः(ख्), करोत्येधांं(व्)सि भस्मसात् ।
तथा मद्विषया भक्ति- रुद्धवैनां(व्)सि कृत्स्नशः ॥ 19॥

yathāgniḥ(s) susamṛddhārciḥ(kh), karotyedhāṃ(v)si bhasmasāt .
tathā madviṣayā bhakti- ruddhavaināṃ(v)si kṛtsnaśaḥ .. 19..

susamṛd+ dhārciḥ(kh), karotye+ dhāṃ(v)si, ruddhavai+ nāṃ(v)si

न साधयति मां(म्) योगो, न सां(ङ्)ख्यं(न्) धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो, यथा भक्तिर्ममोर्जिता ॥ 20॥

na sādhayati māṃ(m) yogo, na sāṃ(ṅ)khyaṃ(n) dharma uddhava .
na svādhyāyastapastyāgo, yathā bhaktirmamorjitā .. 20..

svādhyā + yastapas+ tyāgo, bhaktir +mamor+ jitā

भक्त्याहमेकया ग्राह्यः(श्), श्रद्धयाऽऽत्मा प्रियः(स्) सताम् ।
भक्तिः(फ्) पुनाति मन्निष्ठा, श्वपाकानपि सम्भवात् ॥ 21॥

bhaktyāhamekayā grāhyaḥ(ś), śraddhayā''tmā priyaḥ(s) satām .
bhaktiḥ(ph) punāti manniṣṭhā, śvapākānapi sambhavāt .. 21..

bhaktyā+ hamekayā, śvapākā+ napi

धर्मः(स्) सत्यदयोपेतो, विद्या वा तपसान्विता ।
मद्भक्त्यापेतमात्मानं(न्), न सम्यक् प्रपुनाति हि ॥ 22॥

dharmaḥ(s) satyadayopeto, vidyā vā tapasānvitā .

madbhaktyāpetamātmānaṃ(n), na samyak prapunāti hi .. 22..

satya+ dayopeto, mad+ bhaktyā + peta+ mātmānaṃ(n)

कथं(म्) विना रोमहर्षं(न्), द्रवता चेतसा विना ।

विनाऽऽनन्दाश्रुकलया, शुध्येद् भक्त्या विनाऽऽशयः ॥ 23 ॥

kathaṃ(m) vinā romaharṣaṃ(n), dravatā cetasā vinā .

vinā''nandāśrukalayā, śudhyed bhaktyā vinā''śayaḥ .. 23..

vinā''+ nandā + śrukalayā

वाग् गद्गदा द्रवते यस्य चित्तं(म्),

रुदत्यभीक्ष्णं(म्) हसति क्वचिच्च ।

विलज्ज उद्गायति नृत्यते च,

मद्भक्तियुक्तो भुवनं(म्) पुनाति ॥ 24 ॥

vāg gadgadā dravate yasya cittaṃ(m)

rudatyabhīkṣṇaṃ(m) hasati kvacicca .

vilajja udgāyati nṛtyate ca

madbhaktiyukto bhuvanaṃ(m) punāti .. 24..

rudat+ yabhīkṣṇaṃ(m), mad + bhakti+ yukto

यथाग्निना हेम मलं(ञ्) जहाति,

ध्मातं(म्) पुनः(स्) स्वं(म्) भजते च रूपम् ।

आत्मा च कर्मानुशयं(म्) विधूय,

मद्भक्तियोगेन भजत्यथो माम् ॥ 25 ॥

yathāgninā hema malaṃ(ñ) jahāti

dhmātaṃ(m) punaḥ(s) svaṃ(m) bhajate ca rūpam .

ātmā ca karmānuśayaṃ(m) vidhūya

madbhaktiyogena bhajatyatho mām .. 25..

karm**ā** + nu**ś**aya**ṃ**(m)

यथा यथाऽऽत्मा परिमृज्यतेऽसौ,

मत्पुण्यगाथाश्रवणाभिधानैः ।

तथा तथा पश्यति वस्तु सूक्ष्मं(ञ्),

चक्षुर्यथैवां(ञ्)जनसम्प्रयुक्तम् ॥ 26॥

yathā yatha''tmā parimṛjyate'sau

matpuṇyagāthaśravaṇābhidhānaiḥ .

tathā tathā paśyati vastu sūkṣmaṃ(ñ)

cakṣuryathaivāṃ(ñ)janasamprayuktam .. 26..

mat+ pu**ṇ**ya+ g**ā**th**ā**+ **ś**rava**ṇā**+ bhidh**ā**nai**ḥ**

cak**ṣ**ur + yathaiv**āṃ**(ñ)+ janasam+ prayuktam

विषयान् ध्यायतश्चित्तं(म्), विषयेषु विषज्जते ।

मामनुस्मरतश्चित्तं(म्), मय्येव प्रविलीयते ॥ 27॥

viṣayān dhyāyataścittaṃ(m), viṣayeṣu viṣajjate .

māmanusmarataścittaṃ(m), mayyeva pravilīyate .. 27..

dhy**ā**yata**ś**+ citta**ṃ**(n), m**ā**manus+ marata**ś**+ citta**ṃ**,

तस्मादसदभिध्यानं(म्), यथा स्वप्नमनोरथम् ।

हित्वा मयि समाधत्स्व, मनो मद्भावभावितम् ॥ 28॥

tasmādasadabhidhyānaṃ(m), yathā svapnamanoratham .

hitvā mayi samādhatsva, mano madbhāvabhāvitam .. 28..

tasm**ā+** dasada+ bhidhy**ā**na**ṃ**(m), svapna+ manoratham, mad+ bhava+ bh**ā**vitam

स्त्रीणां(म्) स्त्रीसं(ङ्)गिनां(म्) सं(ङ्)गं(न्), त्यक्त्वा दूरत आत्मवान् ।

क्षेमे विविक्त आसीनश् - चिन्तयेन्मामतन्द्रितः ॥ 29॥

strīṇāṃ(m) strīsaṃ(ṅ)gināṃ(m) saṃ(ṅ)gaṃ(n), tyaktvā dūrata ātmavān .

kṣeme vivikta āsīnaś- cintayenmāmatandritaḥ .. 29..

cintayen+ māma+ tandritaḥ

न तथास्य भवेत् क्लेशो, बन्धश्चान्यप्रसं(ङ्)गतः ।

योषित्सं(ङ्)गाद् यथा पुं(व्)सो, यथा तत्सं(ङ्)गिसं(ङ्)गतः ॥ 30॥

na tathāsya bhavet kleśo, bandhaścānyaprasaṃ(ṅ)gataḥ .

yoṣitsaṃ(ṅ)gād yathā puṃ(v)so, yathā tatsaṃ(ṅ)gisaṃ(ṅ)gataḥ .. 30..

bandhaś + cānya+ prasaṃ(ṅ)gataḥ

उद्धव उवाच

यथा त्वामरविन्दाक्ष, यादृशं(म्) वा यदात्मकम् ।

ध्यायेन्मुमुक्षुरेतन्मे, ध्यानं(न्) त्वं(म्) वक्तुमर्हसि ॥ 31॥

uddhava uvāca

yathā tvāmaravindākṣa, yādṛśaṃ(m) vā yadātmakam .

dhyāyenmumukṣuretanme, dhyānaṃ(n) tvaṃ(m) vaktumarhasi .. 31..

tvā + mara+ vindākṣa, dhyāyen+ mumukṣu + retanme

श्रीभगवानुवाच

सम आसन आसीनः(स्), समकायो यथासुखम् ।

हस्तावुत्सं(ङ्)ग आधाय, स्वनासाग्रकृतेक्षणः ॥ 32॥

śrībhagavānuvāca

sama āsana āsīnaḥ(s), samakāyo yathāsukham .

hastāvutsaṃ(ṅ)ga ādhāya, svanāsāgrakṛtekṣaṇaḥ .. 32..

svanāsā + grakṛte+ kṣaṇaḥ

प्राणस्य शोधयेन्मार्गं(म्), पूरकुम्भकरेचकैः ।

विपर्ययेणापि शनै - रभ्यसेन्निर्जितेन्द्रियः ॥ 33॥

prāṇasya śodhayenmārgaṃ(m), pūrakumbhakarecakaiḥ .

viparyayeṇāpi śanai- rabhyasennirjitendriyaḥ .. 33..

pūra+ kumbha+ karecakaiḥ, rabhya+ sen+ nir+ jitendriyaḥ

हृद्यविच्छिन्नमों(ङ्)कारं(ङ्), घण्टानादं(म्) विसोर्णवत् ।

प्राणेनोदीर्य तत्राथ, पुनः(स्) सं(व्)वेशयेत् स्वरम् ॥ 34॥

hṛdyavicchinnamoṃ(ṅ)kāraṃ(ṅ), ghaṇṭānādaṃ(m) bisorṇavat .

prāṇenodīrya tatrātha punaḥ(s) saṃ(v)veśayet svaram .. 34..

hṛdya+ vic+chin+ namoṃ(ṅ)kāraṃ(ṅ),

bisor+ ṇavat, prāṇeno+ dīrya

एवं(म्) प्रणवसं(य्)युक्तं(म्), प्राणमेव समभ्यसेत् ।

दशकृत्वस्त्रिषवणं(म्), मासादर्वाग् जितानिलः ॥ 35॥

evaṃ(m) praṇavasaṃ(y)yuktaṃ(s), prāṇameva samabhyaset .

daśakṛtvastriṣavaṇaṃ(m), māsādarvāg jitānilaḥ .. 35..

praṇava+ saṃ(y)yuktaṃ(s), daśakṛt+ vas+ triṣavaṇaṃ(m), māsādar+ vāg

हृत्पुण्डरीकमन्तः(स्)स्थ - मूर्ध्वनालमधोमुखम् ।

ध्यात्वोर्ध्वमुखमुन्निद्र - मष्टपत्रं(म्) सकर्णिकम् ॥ 36॥

hṛtpuṇḍarīkamantaḥ(s)stha, mūrdhvanālamadhomukham .

dhyātvordhvamukhamunnidra- maṣṭapatraṃ(m) sakarṇikam .. 36..

hṛt+ puṇḍarī + kamantaḥ(s)+ stha, mūr + dhvanāla + madhomukham,

dhyāt+ vordhva+ mukhamun+ nidra

कर्णिकायां(न्) न्यसेत् सूर्य - सोमाग्नीनुत्तरोत्तरम् ।

वह्निमध्ये स्मरेद् रूपं(म्), ममैतद् ध्यानमं(ङ्)गलम् ॥ 37॥

karṇikāyāṃ(n) nyaset sūrya- somāgnīnuttarottaram .

vahnimadhye smared rūpaṃ(m), mamaitad dhyānamaṃ(ṅ)galam .. 37..

somāgnī+ nut+ tarot+ taram

समं(म्) प्रशान्तं(म्) सुमुखं(न्), दीर्घचारुचतुर्भुजम् ।
सुचारुसुन्दरग्रीवं(म्), सुकपोलं(म्) शुचिस्मितम् ॥ 38॥

**samaṃ(m) praśāntaṃ(m) sumukhaṃ(n), dīrghacārucaturbhujam .**
**sucārusundaragrīvaṃ(m), sukapolaṃ(m) śucismitam .. 38..**

dīrgha+ cāru+ caturbhujam, sucāru+ sundara+ grīvaṃ(m)

समानकर्णविन्यस्तस् - फुरन्मकरकुण्डलम् ।
हेमाम्बरं(ङ्) घनश्यामं(म्), श्रीवत्सश्रीनिकेतनम् ॥ 39॥

**samānakarṇavinyastas- phuranmakarakuṇḍalam .**
**hemāmbaraṃ(ṅ) ghanaśyāmaṃ(m), śrīvatsaśrīniketanam .. 39..**

samā + nakarṇa+ vinyastas, phuran+ makara+ kuṇḍalam, śrīvatsa+ śrīniketanam

शं(ङ्)खचक्रगदापद्म - वनमालाविभूषितम् ।
नूपुरैर्विलसत्पादं(ङ्), कौस्तुभप्रभया युतम् ॥ 40॥

**śaṃ(ṅ)khacakragadāpadma- vanamālāvibhūṣitam .**
**nūpurairvilasatpādaṃ(ṅ), kaustubhaprabhayā yutam .. 40..**

śaṃ(ṅ)kha+ cakra+ gadā+ padma, nūpurair+ vilasat+ pādaṃ(ṅ),

द्युमत्किरीटकटक - कटिसूत्रां(ङ्)गदायुतम् ।
सर्वां(ङ्)गसुन्दरं(म्) हृद्यं(म्), प्रसादसुमुखेक्षणम् ।
सुकुमारमभिध्यायेत् - सर्वां(ङ्)गेषु मनो दधत् ।।41।।

**dyumatkirīṭakaṭaka- kaṭisūtrāṃ(ṅ)gadāyutam .**
**sarvāṃ(ṅ)gasundaraṃ(n) hṛdyaṃ(m), prasādasumukhekṣaṇam**
**sukumāramabhidhyāyet- sarvāṃ(ṅ)geṣu mano dadhat .. 41**

dyumat+ kirīṭa+ kaṭaka, prasāda+ sumukhe+ kṣaṇam, sukumā + ramabhi+ dhyāyet

इन्द्रियाणीन्द्रियार्थेभ्यो, मनसाऽऽकृष्य तन्मनः ।
बुद्ध्या सारथिना धीरः(फ्), प्रणयेन्मयि सर्वतः ॥ 42॥

indriyāṇīndriyārthebhyo, manasā''kṛṣya tanmanaḥ .

buddhyā sārathinā dhīraḥ(ph), praṇayenmayi sarvataḥ .. 42..

indriyā+ ṇīndri+ yārthebhyo, manasā''+ kṛṣya, praṇayen+ mayi

तत् सर्वव्यापकं(ञ्) चित्त - माकृष्यैकत्र धारयेत् ।
नान्यानि चिन्तयेद् भूयः(स्), सुस्मितं(म्) भावयेन्मुखम् ॥ 43॥

tatsarvavyāpakaṃ(ñ) citta- mākṛṣyaikatra dhārayet .

nānyāni cintayed bhūyaḥ(s), susmitaṃ(m) bhāvayenmukham .. 43..

mākṛṣyai+ katra, bhāvayen+ mukham

तत्र लब्धपदं(ञ्) चित्त - माकृष्य व्योम्नि धारयेत् ।
तच्च त्यक्त्वा मदारोहो, न किं(ञ्)चिदपि चिन्तयेत् ॥ 44॥

tatra labdhapadaṃ(ñ) citta- mākṛṣya vyomni dhārayet .

tacca tyaktvā madāroho, na kiṃ(ñ)cidapi cintayet .. 44..

एवं(म्) समाहितमतिर् - मामेवात्मानमात्मनि ।
विचष्टे मयि सर्वात्मन्, ज्योतिर्ज्योतिषि सं(य्)युतम् ॥ 45॥

evaṃ(m) samāhitamatir- māmevātmānamātmani .

vicaṣṭe mayi sarvātman, jyotirjyotiṣi saṃ(y)yutam .. 45..

māmevātmā+ namātmani, jyotir+ jyotiṣi

ध्यानेनेत्थं(म्) सुतीव्रेण, युं(ञ्)जतो योगिनो मनः ।
सं(य्)यास्यत्याशु निर्वाणं(न्), द्रव्यज्ञानक्रियाभ्रमः ॥ 46॥

dhyānenetthaṃ(m) sutīvreṇa, yuṃ(ñ)jato yogino manaḥ .

saṃ(y)yāsyatyāśu nirvāṇaṃ(n), dravyajñānakriyābhramaḥ .. 46..

dhyāne+ netthaṃ(m), saṃ(y)yās+ yatyāśu, dravya+ jñāna+ kriyābhramaḥ

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)
सं(व्)हितायामेकादशस्कन्धे चतुर्दशोऽध्यायः ॥ 14॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)

saṃ(v)hitāyāṃ ekādaśaskandhe caturdaśo'dhyāyaḥ .. 14..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|

Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||

Om Shāntih(ś) Shāntih(ś) Shāntih ||

